वि+परि+परिवर्त्तनेन आच्छादने। "आचान्तः पुनराचामेत् वासो विपरिधाय च" याज्ञ०।

पुरस्+अग्रतः स्थापने। पुरोहितः। "तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः" कुमा०।

प्र+प्रकर्षेण धारणे। "दिशस्ततस्तः सहसा प्रधापिताः" भाग० २० अ०। प्रधानम्।

प्रति+प्रक्षेपे "तदग्ने चक्षुः प्रतिधेहि रेभे" ऋ०१०।८७।१२। प्रतीकारार्थे विधाने "दुष्टदैवतनाशाय यज्ञो ध्यानसमाधिना। कर्मत्वाच्चतविक्षेपात् शान्तिकं प्रतिधास्यति" शतरुद्र० प्रतिविधाने।

वि+करणे "तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्" गीता। "विदधाति विभज्येह फलं पूर्वकृतं नृणाम्" भा० व० यच्चान्यदपि कर्त्तव्यं तद्विधत्स्व महामते" स० ७६ अ०। कर्त्तव्यतयोपदेशे "यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते" मनुः।"चिकीर्षितकृतिसाध्यत्वहेतुधीविषयो विधिः" शब्द०श० विधिशब्दे दृश्यम्। "न पैतृयाज्ञियो होमो लौकिकेऽग्नौ विधीयते" मनुः।

अनु+वि+तुल्यरूपाचरणे पश्चात्करणे च। "आनुपूर्व्येण ह विषां देवत उच्चैरुपांशुतायां चाध्वर्युमनुविदधीत" सांख्या०श्रौ० १२।१।२ "वृत्तिं च तेभ्योऽनुविधाय काञ्चित्" भा०उ०२६अ०। "उपतिष्ठति तिष्ठन्तं गच्छन्तमनुगच्छति। करोति कुर्वतः कर्म छायेवानुविधीयते" भा० शा० १८१। "इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते" गीता।

प्रति+वि+प्रतिरूपाचरणे "क्षिप्रमस्मिन्नरव्याघ्र चारः प्रतिविधीयताम्" रामा०सुन्द० प्रतीकारे च "क्षिप्रमेव कस्मान्न प्रतिविहितमार्य्येण" मुद्रारा० चन्द्रगुप्तोक्तिः "न पारितं प्रतिविधातुम्" तत्रैव चाणक्योक्तिः।

श्रद्+आदरे विश्वासे च।"श्रद्दधाति क इवेह न साक्षात्"नैष०।

सम्+सम्यग्विधाने योजने सन्धाने अभिसन्धौ। "मनस्येतानि सन्धाय मनसा सम्प्रधारयेत्" भा० आश्व० ४२ अ०। "यथा सूच्या वासः संदध्यात्" ऐ० ब्रा० ८।३।४८। "धनुष्यमोघं समधत्त सायकम्" कुमा०। "संदधे धनुषि वायुदैवतम्" रघुः। "भवति कृतसन्धानमिव तत्" शकु०। मेलने "सकृद्दुष्टं यो हि मित्रं पुनः सन्धातुमिच्छति" चाणक्यः।

अति+सम्+अतिशयेन शस्त्रादिना व्यधने संयोजने। "त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः" शकु०।

अनु+सम्+अनुसन्धाने विचारजन्यज्ञानभेदे अनुचिन्तने "आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" मनुः। अन्वेषणे च "दुर्गमनुसन्धेहि" हितो०।

अभि+सम्+तात्पर्य्ये अभिलाषभेदे। "अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्" गीता। "भवन्तमभिसन्धाय जिघांसन्ति भवत् प्रियम्" भा०शा०२१०५ श्लो०। "श्राद्धानि चैव कुर्वन्ति फलकामाः सदा नराः। अभिसन्धाय पितरं पितुश्च पितरं तथा" हरिवं०१६अ० "गूढाभिसन्धिः शङ्कते" जगदीशः। "अभिसन्ध्यादिषु चैवम्" सा० सू०।

प्रति+सम्+प्रतिरूपसन्धाने।"प्रतिसन्धाय चास्त्राणि तेऽन्योन्यस्य विशाम्पते!। मुमुचुः पाण्डवाश्चैव कौरवाश्च महामृधे" भा० भी० ७५ अ०। "पश्यतः प्रतिसन्धाय विध्यतः सव्यसाचिनः" भा० वि० ६१ अ०।

**धाक** त्रि० धा—उणा०क तस्य नेत्त्वम्।१धारके २ब्रह्मणि पु० मेदि०। ३वृषे ४आहारे च ५अन्ने ६स्तम्भे च संक्षिप्तसा० उणादिवृत्तिः।

**धा(घा)टी** स्त्री घटन्ते हिंस्यतेऽत्र घट—हिंसायां आधारे घञ् गौरा० ङीष् पृषो० घस्य धः घाटी वा तत्र पाठः। अभ्यवस्कन्दने शत्रुसम्मुखगमने हेमच०।

**धाणक** पु० धा—आणक। दीनारभागे परिमाणभेदे। उज्ज्वलद०।

**धातक** पु० धातुं करोति णिच् टिलोपः ण्वुल्। पुष्करद्वीपस्थापतेः वीतहोत्रस्य १पुत्रभेदे "तद्द्वीपस्याधिपतिः प्रैयव्रतो वीतिहोत्रो नाम तस्यात्मजौ रमणधातकनामानौ वर्षपती नियुज्य" भाग० ५।२०।२२। गौरा० ङीष्। (धाइफुल) २धातुपुष्प्याम् राजनि०। "धातकी कटुका शीता मदकृत् तुवरा लघुः। तृष्णातीसारपित्तास्रविषक्रिमिविसर्पजित्" भावप्र०तद्गुणाः। ३तीर्थभेदे शिवपु०।

**धातक्यादिलेह** चक्रदत्तोक्ते लेहभेदे "धातकीविल्वधन्याकलोध्रेन्द्रयवबालकैः। लेहः क्षौद्रेण बालानां ज्वरातीसारवान्तिजित्" चक्र०।

**धातु** पु०धीयते सर्वं निःक्षिप्यते सुषुप्त्यादावस्मिन् धा—आधारे तुन्। १परमात्मनि। "स एष चिद्धातुः"श्रुतिः। दधाति शब्दान्। २सर्वेषां नाम्नां प्रकृतिभूते भूप्रभृतौ तस्य लक्षणविभागादिकं शब्दार्थरत्नेऽस्माभिर्दर्शितं यथा

"धातुर्नाम क्रियावाचकोगणादिपठितः शब्दविशेषः क्रिया च पूर्वोक्तफलानुकूलो व्यापार एव सर्वेषाञ्च धातू-